यजुर्वेद-सामवेद-संस्कारभाष्यकर्त्रा वेदान्तसूत्रेषु वैदिकभाष्यनिर्मात्रा भगवद्गीतासु
भगवद्भाष्यरचयित्रा काशीपण्डित-सभया "पण्डितराजे"त्युपाधिविभूषितेन
स्वामिश्रीभगवदाचार्यंयतिराजेन विरचितेन

केनोपनिषत्संस्कारभाष्येण

संवलिता

केनोपनिषत्

मङ्गलाचरणम्

आचार्यपरमानन्दपदद्वन्द्वमुपास्महे ।
यत्कृपालेशतोपि स्यादुद्धारो नः क्षणादपि ॥१॥
दिव्यदृष्टिर्यतः प्राप्ता सत्यमार्गानुगामिनी ।
तामहं गुरुपादानां पादुकां शिरसा वहे ॥२॥
तमोघ्नं सर्वदोषघ्नं सर्वज्ञानप्रकाशकम् ।
रजः श्रीगुरुपादानां केवलं शरणं मम ॥३॥
अरण्यं कण्टकाकीर्णं निर्भीकः प्रविशाम्यहम् ।
तत्र श्रीमद्गुरोः पादपङ्कजालम्बनं महत् ॥४॥
व्याख्यातुमुत्सहे भव्या भव्यैरुपनिषद्गवीः ।
भावैः शब्दैश्च सत्कृत्याः परामार्थप्रकाशिकाः ॥५॥
मृच्छिलाखण्डयुक्तोपि गोधूम इति कथ्यते ।
मृच्छिलाखण्डसंयोगवियुक्तो हि स भुज्यते ॥६॥
समालम्ब्य गुरूणां तत्पादद्वन्द्वं महाप्रभम् ।
क्रमेण तलवकारे हि व्याख्यानं तन्यते मया ॥७॥
सज्जना जनयिष्यन्ति हृदयेत्र महादरम् ।
दुर्जना जनयिष्यन्ति हृदये विषमुल्बणम् ॥८॥
तेषामेव विषेण स्याद्धानिस्तेन दुरव्यया ।
पायाच्छ्रीराम एवात्र तान्सदेत्येव कामये ॥९॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ केनोपनिषद्

अथ केनोपनिषदि प्रथमः खण्डः

गाढान्धपटलोत्पाटि प्रोद्घाटि ज्ञानचक्षुषः ।
तत्किमप्याश्रये कामं निर्मलं श्यामलं महः ॥१॥

मनःप्रभृतीनां करणानामचेतनत्वात्तेषां स्वतः प्रवृत्तेरसम्भवात्तेषां प्रेरयिता क इति कश्चिच्छिष्यः कञ्चन महाचार्यं पृच्छति ।

केनेषितं पतति प्रेषितं मनः केन प्राणः प्रथमः प्रैति युक्तः । केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति ॥१॥

केनादृष्टेन प्रेषितं प्रेरितं मन इषितमिष्टं विषयं प्रति पतति गच्छति । तथा केन युक्तो मिलितः प्रथमः सर्वश्रेष्ठो विस्तृतो वा प्राणः प्रैति प्रकर्षेण गच्छति व्यापारवान्भवतीत्यर्थः । तथा केन प्रेरिता लोका ईषितां प्रचलितां सर्वजनप्रसिद्धामिमां वाचं वदन्ति । उ इति प्रश्नार्थेव्ययः सर्ववाक्यसंयोगी । को देव चक्षुः श्रोत्रं च स्वस्वव्यापारे युनक्ति योजयति । इन्द्रियाणां विषयग्रहणे नियोक्ता क इति । केनेतिपदेनास्यारम्भात्केनेतिनाम्ना अस्या उपनिषदः प्रवृत्तिः । कर्ता क इति ज्ञातुं नास्ति सुगमः पन्थाः । विनापि च चार्थो गम्यत इति सर्वत्र चकार उपस्थापयितव्यः केनेषितं पतति प्रेषितं मनः केन च प्राणः केन चेषितां वाचमित्यादिरीत्या ॥१॥

एवं शिष्येण पृष्ट आचार्य उपदिशति–

श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राणश्चक्षुषश्चक्षुः । अतिमुच्य धीरा प्रेत्यास्माल्लोकादमृता भवन्ति ॥२॥

श्रोत्रस्य श्रोत्रेन्द्रिस्य श्रोत्रं श्रवणशक्तिप्रदः स उ स एव । मनसो मननसाधनीभूतस्य मननशक्तिप्रदः स एव । वाचो वागिन्द्रियस्य वाचमुच्चारणशक्तिप्रदः स एव । वाचमित्यौपनिषदी द्वितीया । प्राणस्य मुखनासिकासंचरणशीलस्य वायोः प्राणः प्राणनशक्तिप्रदः स एव । चक्षुषश्चक्षुरिन्द्रियस्य चक्षुर्दर्शनशक्तिप्रदः स एव । स कः ? यद्यं सर्वसामर्थ्यवन्तमतिमुच्य सर्वथा विज्ञाय धीरा धीमन्तोस्माल्लोकाच्छरीरात्प्रेत्य निःसृत्यामृता अमरणधर्माणो भवन्ति मुक्ता भवन्तीत्यर्थः । नन्विदं त्वाम्रान्पृष्टः कोविदारानाचष्ट इत्याख्यानकमनुसरति । न हि प्रश्नवाक्येमृतभवनं प्रति कश्चन प्रश्नः । कथं तर्ह्यमृता भवन्तीत्युक्तिः संगच्छेतेति । उच्यते । इयं ह्युपनिषद् । ब्रह्मविद्योपनिषच्छब्देन प्रख्याता । अतो ब्रह्मोपदेशस्तु कर्तव्य एव । अपृष्टोपि दयालुर्ऋषिरमृतभवनप्रकारमाहेति । अतिमुचेरिह ज्ञानमर्थः । सामर्थ्यात् । केनेषितं पततीत्यादि प्रश्नानामपीहोत्तरं दत्तमेव । स परमात्मा श्रोत्रस्य श्रोत्रं मनसो मन इत्याद्युक्त्या श्रोत्रादीनां प्रवर्तकमप्याह । अतिमुच्य धीराः प्रेत्यास्मादित्याद्युक्तिमंर्हर्षेर्दयालुतां द्योतयति । अपृष्टोपि हितं ब्रूयादितिन्यायानुसरणं द्रष्टव्यम् ॥२॥

प्रेत्यास्माल्लोकादमृता भवन्तीत्युक्तम् । अमृतं ब्रह्मैव नान्यदिति निश्चित्य महर्षिराह ब्रह्मस्वरूपम्—

यद्वाचानभ्युदितं येन वागभ्युद्यते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥३॥

यद्वाचानभ्युदितमनुक्तं भवति वाक्च येनाभ्युद्यते उच्चार्यते । येनेति हेतौ तृतीया । तदेव त्वं ब्रह्म विद्धि जानीहि । नेदं ब्रह्म यदिदं जगदुपासते लोकाः । न जगदेव ब्रह्म जगतोपि प्रेरयितृ हि तत् ॥३॥

यन्मनसा न मनुते येनाहुर्मनो मतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥४॥

यन्मनसा न मनुते नावगच्छति कश्चित् परं येन मनो मतं विज्ञातमाहुर्विद्वांसो मत्तः पूर्वभाविनस्तदेव ब्रह्म विद्धि नेदं यदिदमुपासते लोकाः ॥४॥

यच्चक्षुषा न पश्यति येन चक्षूंषि पश्यन्ति ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥५॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न यच्चक्षुषा लौकिकनेत्रेण पश्यति परं येन चक्षूंषि पश्यन्ति चक्षुषां व्यापारं दर्शनादिकं कुर्वन्ति तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते लोकाः ॥५॥

यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥६॥

यच्छ्रोत्रेण न किञ्चिच्छृणोति श्रोत्राभावात्; परं येन प्रेरकेणेदं मया श्रुतमिति श्रोत्रं मन्यते। शब्दभेदो नार्थभेदः। तदेव ब्रह्मत्वं विद्धि नेदं यदिदमुपासते ॥६॥

यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥७॥

यत्प्राणेन न प्राणिति जीवति परं येन प्राणः प्रणीयते प्रेर्यते स्वकार्यं सम्पादायितुं तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते। केनेषितमितिप्रथमया श्रुत्योत्थापिताः प्रश्नाः प्रथमेन खण्डेन समाहिताः ॥७॥

इति केनोपनिषदि प्रथम खण्डः समाप्तः

अथ केनोपनिषदि द्वितीयः खण्डः

प्रथमखण्डे ब्रह्मणो दुर्विज्ञेयत्वमुपपाद्याधुना ब्रह्मज्ञानोपायमावेदयत्याचार्यः—

यदि मन्यसे सुवेदेति दहरमेवापि नूनं त्वं वेत्थ ब्रह्मणो रूपं यदस्य त्वं यदस्य देवेष्वथ नु मीमांस्यमेव ते मन्ये विदितम् ॥१॥

हे शिष्य यदि त्वमिति मन्यसे। इति किम् ? अहं ब्रह्म सु वेद सम्यग्जानामि तदा त्वमस्य ब्रह्मणो रूपं दहरमेवाल्पमेव वेत्थ जानासि, नूनं नास्ति तत्र विवाद इति। अस्य यत्त्वं रूपमसि देवेषु देवाश्चास्य यद्रूपम्। देवेष्विति प्रथमार्थे सप्तमी। त्वमपि ब्रह्मरूपमेव देवा अपि ब्रह्मरूपमेव। परं नैतावता ब्रह्मण इयत्ता वेदितव्या। अध नु इतः परमपि मीमांस्यमेव। तस्य व्यापकत्वात्सर्वनिविष्ट सद्भवतु नाम तस्य तत्तद्वस्तुरूपम्। वस्तुतस्तु तन्मीमांस्यमेव विचार्यमेव। तस्मान्मन्ये तेविदितं न विदितमिति। मन्ये विदितमित्यत्राकारप्रश्लेषः कार्यः। यदि त्वं वदसि ब्रह्माहं जानामीति तर्हि नूनं त्वं ब्रह्म न जानीषेतश्च मीमांस्यमेवेति ॥१॥

नाहं मन्ये सुवेदेति नो न वेदेति वेद च ।
यो नस्तद्वेद तद्वेद नो न वेदेति वेद च ॥२॥

अहं तत्सुवेदेति न मन्ये। न हि साकल्येन यथार्थ्येन चाहं तद्वेद। नोस्माकं मध्ये यः कथयति न वेद नाहं ब्रह्म वेदेति, वेद च स एव तद्वेत्ति। तदज्ञानमेव तज्ज्ञानमिति तात्पर्यम्। यद्वस्तु यथा स्यात्तथैव तज्ज्ञानं तस्य ज्ञानं भवति। ब्रह्म सर्वथाविज्ञेयमेवास्ति, ततस्तदविज्ञेयत्वज्ञानमेव तज्ज्ञानम्। यो नरो नोस्माकं मध्ये तद्वेद तथा वेद तदविज्ञेयमिति वेद स तद्वेद। किं च नोस्माकं मध्ये यो न वेदाहमिति जानाति वेद च स एव तद्ब्रह्म जानाति। ब्रह्मणोज्ञानमेव ब्रह्मज्ञानम् ॥२॥

पूर्वोक्तमेव स्पष्टयति—

यस्यामतं तस्य मतं मतं यस्य न वेद सः ।
अविज्ञातं विजानतां विज्ञातमविजानताम् ॥३॥

यस्य ब्रह्मामतं तस्यैव मतम्। यः कथयति ब्रह्म मया मतं विदितं ज्ञातं तस्य ब्रह्मज्ञातमेव। परं यः कथयति ब्रह्म मयामतमविदितमज्ञातं तस्य तद्विदितमेव। यस्य च तन्मतम् यः कथयति ब्रह्म मया मतं विदितं ज्ञातं स न तद्वेद। अतो विजानतां तदविज्ञातमेव। अविजानतां च विज्ञातमेव। तस्यावेदनमेव तद्वेदनमिति तात्पर्यम् ॥३॥

प्रतिबोधविदितं मतममृतत्वं हि विन्दते ।
आत्मना विन्दते वीर्यं विद्यया विन्दतेमृतम् ॥४॥

प्रतिकूलो बोधः प्रतिबोधः। अहं न बोधामीति प्रतिकूलो बोधः। प्रतिबोधेन विदितं चेदवश्यं मतं विदि-

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तमेव। स हि गच्छत्यमृतत्वं मोक्षम्। आत्मना बुद्धया विवेकेनेत्यर्थः। पूर्वोक्तश्रुत्युक्तरीत्या विवकेनेतिभावः। वीर्यं तद्वेदनसामर्थ्यं विन्दते। तद्वेद नसामर्थ्येन जातया विद्ययामृतं विन्दते ब्रह्म प्राप्नोति। अमृतमित्यत्र पदद्वयमपि विभावनीयम् अमिति ऋतमिति च। अमिति शैघ्र्यार्थकमव्ययपदम्। ऋतं सत्यं तच्च ब्रह्मैव। एवं च विद्यया शीघ्रमेवर्तं विन्दत इति भावः ॥४॥

इह चेदवेदीदथ सत्यमस्ति न चेदीहावेदीन्महती विनष्टिः। भूतेषु भूतेषु विचिन्त्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति ॥ ५ ॥

इहास्मिञ्जन्मनि चेदवेदीदज्ञासीदात्मस्वरूपं वा ब्रह्मस्वरूपं वा तर्हि सत्यमस्ति कल्याणकरमस्ति। न चेदिहावेदीत्, महती विनष्टिर्महदकल्याणं स्यात्। भूतेषु भूतेषु सर्वभूतेषु स्थितं ब्रह्मात्मस्वरूपं वा विचिन्त्य विविच्य सर्वथा विज्ञाय धीरा बुद्धिमन्तोस्माल्लोकाद्देहात्प्रेत्य वियुज्यामृता भवन्ति जनिमृतिविमुक्ता भवन्ति। द्वे एव ज्ञाने वस्तुत इष्टे ब्रह्मज्ञानमात्मज्ञानं चेति। तयोरपि वस्तुतस्त्वात्मज्ञानमेव विमुक्तिसाधनम्। आत्मज्ञानमित्यस्य मया किं कर्तव्यं न कृतं कृतं वा किमकर्तव्यमितिज्ञानमेवात्मज्ञानशब्दाभिलप्यम्। ब्रह्मज्ञानं नातीवोपकारकम्। कश्चिन्महात्मास्तीतिज्ञानेन न किमपि सिद्धं भवति न वा किमपि साधनीयं भवति। अहं महात्मा सर्वदुरवगाहदुरितरतिविरत इति ज्ञानमेव स्वकल्याणसाधकम्। अतः स्वमेव विचिन्तनीयम्। स्वविचिन्तनेन स्वं पावित्र्यं नेयम्। तेन परमकल्याणं मुक्तिपदवेद्यं सम्पादितं भवतीति ॥५॥

इति केनोपनिषदि द्वितीय खण्डे

काशीपण्डितसभया "पण्डितराजे" त्युपाधिविभूषितेन परमहंस-परिव्राजकाचार्य-स्वामिश्रीभगवदाचार्येण निर्मितं केनोपनिषत्संस्कारभाष्यम्।

अथ केनोपनिषदि तृतीयः खण्ड

ब्रह्मणोद्भुतत्वाद्विचित्रशक्तिसम्पन्नत्वाच्च नाहं मन्ये सुवेदेत्यादिना प्रतिप्रादितं दुर्ज्ञेयत्वमाख्यायिकामुखेन द्रढयति–

ब्रह्म ह देवेभ्यो विजिग्ये। अथ तस्य ह ब्रह्मणो विजये देवा अमहीयन्त। त ऐक्षन्तास्माकमेवायं विजयोस्माकमेवायं महिमेति ॥ १ ॥

देवा दानवाश्चोभयेपि वित्तलम्पटाः। वृद्धिगते च वित्तलाम्पट्ये कलहकलकलवैकल्यमनिवार्यम्। तत इदं ममेदं ममेतिकुर्वतां देवदानवानां समजनि जन्यम्। तत्र ह ब्रह्म देवान्प्रविश्य देवेभ्यो विजययशःप्रदानाय विजिग्ये दैत्यान्व्यजयत। अथ युद्धसमाप्त्यनन्तरं ब्रह्मणो विजये देवानाविष्टस्य ब्रह्मणो विजये सति देवा अमहीयन्त अपूज्यन्त प्रशस्ता अभवन्नितिभावः। महीङ् पूजायाम्। ते देवा ऐक्षन्त व्यचारयन्तायं विजयलाभप्रयुक्तो महिमा महत्त्वमस्माकमेवेति। तेनास्माकमेवायं महिमेति ॥१॥

तद्धैषां विजज्ञौ। तेभ्यो ह प्रादुर्बभूव। तन्न व्यजानत किमिदं यक्षमिति ॥ २ ॥

तद्ब्रह्मैषां देवानामहङ्कारमितिशेषः। विजज्ञौ विज्ञातवत्। ततस्तेभ्यस्तेषां शिवं सम्पादयितुमितिभावः। प्रादुर्बभूव प्राकट्यं गतम्। तत्प्रत्यक्षीभूतं ब्रह्म देवा न व्यजानत किमिदं यक्षं यजनीयं महाश्चर्यमिति ॥२॥

देवा यक्षपरीक्षणार्थमग्निमामन्त्रयाञ्चक्रुः—

तेग्निमब्रुवञ्जातवेद एतद्विजानीहि किमेतद्यक्षमिति। तथेति ॥ ३ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ते देवा अग्निमब्रुवन् , जातवेदो जातं जातं प्रत्येकं वस्तु वेत्तीति तत्सम्बुद्धौ । त्वं सर्वं जातमात्रं जानीषे तदेतद्विजानीहि किमेतद्यक्षमिति । तथेति तथा करोमि यक्षं ज्ञातुं प्रयत इत्युक्तवान् ॥३॥

तदभ्यद्रवत् । तमभ्यवदत्कोसीति । अग्निर्वा अहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मीति ॥ ४ ॥

सोग्निस्तद्यक्षमभ्यद्रवच्छीघ्रमुपागच्छत् । उपागतमग्निं यक्षमप्राक्षीत्कोसीति । यक्षेण पृष्टोग्निरुवाच "अहमग्निः सर्वाग्रयायी देवोस्मि ।" स्वविशिष्टधर्ममवगमयितुमाह जातवेदा अहमस्मीति । जातं जातं सर्वमेव ज्ञातं जन्यपदार्थं च वेद्मीति ॥४॥

तस्मिंस्त्वयि किं वीर्यमिति । अपीदं सर्वं दहेयं पृथिव्यामिति ॥ ५ ॥

तद्यक्षमपृच्छत्तमग्निं तस्मिंस्त्वय्यग्नौ जातवेदसि वा किं वीर्यं सामर्थ्यमिति । अग्निशब्देन जातवेदःशब्देन वा प्रत्यक्षितमर्थं पृष्ठतः कृत्वायं प्रश्नः । अग्निः प्रत्यवादीत्पृथिव्यां यदिदं किञ्च नास्ति सर्वं दहेयमिति ॥ ५ ॥

परीचिक्षिषयाग्निमुवाच यक्षम्–

तस्मै तृणं निदधौ । एतद्दहेति । तदुपप्रेयाय सर्वजवेन । तन्न शशाक दग्धुम् । स तत एव निववृते । नैतदशकं विज्ञातुं यदेतद्यक्षमिति ॥ ६ ॥

तद्ब्रह्म तस्मै तस्य पुरस्तात्तृणं निदधौ स्थापितवत् । उवाच चैतद्दहेति । तच्छ्रुत्वा सर्वजवेन सर्वसामर्थ्येनोपप्रेयाय तत्तृणसमीपं जगाम परं तद्दग्धुं न शशाक सः । तत एव तस्मादेव त्रपानताननोनलो निववृत्ते न्यवृतत् । देवानां सन्निधावेत्य सोवदद्यदेतद्यक्षमस्ति तद्विज्ञातुं नाहमशकमिति ॥६॥

देवा इदानीं यक्षपरीक्षार्थं वायुं प्रेषयन्ति—

अथ वायुमब्रुवन् वायवेतद्विजनीहि किमेतद्यक्षमिति । तथेति ॥ ७ ॥

देवा वायुमब्रुवन् वायो किमेतद्यक्षमिति त्वमेतद्विजानीहि । तथेत्युक्त्वा वायुर्यक्षमगच्छत् ॥७॥

तदभ्यद्रवत् । तमभ्यवदत्कोसीति । वायुर्वा अहमस्मीत्यब्रवीन्मातरिश्वा वा अहमस्मीति ॥ ८ ॥

स वायुस्तद्यक्षमभिजगाम । कोसीति यक्षेण पृष्ट उवाचाहं वायुः सर्वत्र गमनशीलोस्मि । वा गतिगन्धनयोः । नैतदेव । अहं मातरिश्वास्मीति । मातर्यन्तरिक्षे श्वयति वर्धत इतिमातरिश्वा । भुव्यन्तरिक्षे च मम गतिरिति ॥८॥

यद्यपि वायुमातरिश्वञ्शब्दसमुच्चारणेनैव स स्वसामर्थ्यमुदाजहार तथापि तदभिव्यञ्जयितुं पृच्छति यक्षम्–

तस्मिंस्त्वयि किं वीर्यमिति । अपीदं सर्वमाददीय यदिदं पृथिव्यामिति ॥ ९ ॥

यक्षेण जिज्ञासितं तस्मिन्वायौ मातरिश्वनि वा त्वयि किं वीर्यं सामर्थ्यम् । वायुः प्रत्यवादीत् यदिदं पृथिव्यामस्ति तदिदं सर्वमप्याददीय सर्वं ग्रहीतुमुड्डाययितुं वा समर्थोस्मीति ॥९॥

तस्मै तृणं निदधौ । एतदादत्स्वेति । तदुपप्रेयाय सर्वजवेन । तन्न शशाकादातुम् । स तत एव निववृते । नैतदशकं विज्ञातुमेतद्यक्षमिति ॥ १० ॥

तद्यक्षं वायोरग्रेपि तृणं स्थापितवदुक्तवच्चैतदादत्स्वगृहाणेति । सर्वजवेन तत्तृणमुपप्रेयायोपजगाम परं तदादातुं स न शशाक । तत एव स निववृते नापरं सामर्थ्यं प्रकटयितुमुत्सेह इत्यर्थः । उक्तं च तत्रागत्य नाहमशकमेतद्यक्षं विज्ञातुमिति ॥१०॥

देवा इदानीमिन्द्रं प्रेषयन्ति—

अथेन्द्रमब्रुवन् । मघवन्नेतद्विजानीहि किमेतद्यक्षमिति । तथेति । तदभ्यद्रवत् तस्मात्तिरोदधे ॥ ११ ॥

अथ तदनन्तरं देवा इन्द्रमब्रुवन् हे मघवन्नस्माकं पूज्य । मह पूजायाम् । एतद्विजानीहि किमेतद्यक्षमिति । तथा करोमीत्युक्त्वा स तद्यक्षमभ्यद्रवदभ्यगच्छत् । तस्मादिन्द्रात्तद्यक्षं तिरोदधे तिरोहितमभूत् ॥११॥

स तस्मिन्नेवाकाशे स्त्रियम् (स्त्रियम्) आजगाम बहुशोभमानामुमां हैमवतीम् । तां होवाच किमेतद्यक्षमिति ॥ १२ ॥

इति केनोपनिषदि तृतीयः खण्डः

स इन्द्रस्तस्मिन्नेवाकाशेवकाशे स्थाने बहुशोभमानां परमशोभासम्पन्नाम् उमामद्यावधि कुतः किमपि न

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रतिभाति स्मेति वितर्कणार्हा मा शोभा प्रतिमा यस्या- स्तां हैमवतीं परमशीतलां शान्तिप्रदां स्त्रियं श्रियं वा आजगाम प्राप्तवान्। ह हृष्टो भूत्वा स तामुवाच किमेतद्यक्षमिति ॥१२॥

इति श्रीकेनोपनिषदि तृतीयस्मिन्खण्डे

काशीपण्डितसभया "पण्डितराजे" त्युपाधिविभूषितेन परमहंस-परिव्राजकाचार्य-स्वामि-श्रीभगवदाचार्येण निर्मितं केनोपनिषत्संस्कारभाष्यम्।

अथ केनोपनिषदि चतुर्थः खण्डः

इन्द्रायोमाकृतमुपदेशमाह—

ब्रह्मेति होवाच। ब्रह्मणो वा एतद्विजये महीयध्वमिति। ततो हैव विदांचकार ब्रह्मेति ॥ १ ॥

इद्रेण पृष्टा सोमा ज्ञानप्रदात्री। टुवम उद्गिरणे। ज्ञानं वमत्युद्गिरतीत्युमा। उवाच। त्वामिन्द्रं दृष्ट्वा यत्तिरोदधे। तद्ब्रह्मासीदिति। ब्रह्मणो वा ब्रह्मण एवैतद्विजये महीयध्वं प्रशस्ता भवतेति। बहुवचनं देवगणमुद्दिश्य। अस्माभिर्विजयः कृत इति गर्वं मा कुरुत। तत एवोमाकृतोपदेशात्परमेवेन्द्रो विदाञ्चकार ब्रह्मेति तद्ब्रह्मासीदिति ॥१॥

तस्माद्वा एते देवा अतितरामिवान्यान्देवान्यदग्निर्वायुरिन्द्रस्ते ह्येनन्नेदिष्ठं पस्पृशुः। ते ह्येनत्प्रथमो विदाञ्चकार ब्रह्मेति ॥ २ ॥

तस्माद्ब्रह्मदर्शनाद्धेतोरेतेन्यान्देवानतितरामिव। ओजसातिक्रम्य स्थिता इव। न हि विस्पष्टं ब्रह्मदर्शनं जातमितीवप्रयोगः। कानन्यान्देवान्? यद्ये ब्रह्मरूपं यक्षं द्रष्टं गतास्तानग्निं वायुमिन्द्रमिति। कथं तेषामन्यापेक्षयौत्कर्ष्यमिति? हि यतस्ते नेदिष्ठमत्यन्तसमीपस्थं ब्रह्म पस्पृशुर्ददृशुः। हि किञ्च ते देवाः प्रथमः प्रथममेनद्ब्रह्म विदाञ्चकार दृष्टवन्तः। न हि देवानां ब्रह्मणो वेदनं जातमज्ञातरीत्येव केवलं ब्रह्मदर्शनं दूरादेव जातम्। अतएव विदाञ्चकारेति गौणः प्रयोगो दर्शनार्थे। दृशेः प्रयोगस्तु स्पष्टदर्शनेस्पष्टदर्शनेपि सर्वत्र सर्वैः प्रयुज्यते ॥२॥

तस्माद्वा इन्द्रोतितरामिवान्यान्देवान्। स ह्येनन्नेदिष्ठं पस्पर्श। सह्येनत्प्रथमो विदाञ्चकार ब्रह्मेति ॥ ३ ॥

तस्मादेवेन्द्रोन्यान्देवानतितरामिवातिक्रम्येवावस्थितः। तस्मादिति विवृणोति—स इन्द्रो हि एनद्ब्रह्मनेदिष्ठमतिसमीपात्पस्पर्श ददर्श। ननु तस्मै तु ब्रह्मदर्शनं जातमेव न हि। तं दृष्ट्वैव तत्तिरोहितमासीत्। कथं तर्हि देवानन्यानतितरामिवेन्द्रस्येति। उच्यते। नेदिष्ठं ब्रह्म स न पस्पर्शेत्येवं निश्चित्यैव स प्रथमो विदाञ्चकारेति वाक्यप्रयोगः। तद्यक्षं किमासीदिति नाग्निना न वायुनावगतम्। इन्द्रेण तूमासाहाय्येन तावन्मात्रमप्यधिगतम्। अतएव तस्य गरीयस्त्वमिति। वस्तुतस्तु नाममात्रावगत्येन्द्रस्य सर्वश्रेष्ठत्वनिरूपणमन्याय्यमेव। तस्य तु ब्रह्मदर्शनं जातमेव नहि। अग्निना वायुना च ब्रह्मणा सहालोपोपि कृतो दर्शनमपि कृतम्। इन्द्रेण नु किमपि न कृतं कथं तर्हि तस्यातितरान्त्वमिति नावगम्यते। नात्र सत्यवादित्वमस्या उपनिषद इति। नामश्रवणमात्रेण कार्तार्थ्यमाहोस्वित्साक्षाद्दर्शनेनेति विचारणीयम्। नाममात्रावगत्या न कस्यापि वस्त्ववगतिर्भवतीति सर्वजनप्रत्यक्षम्। नामश्रवणापेक्षया दर्शनालापयोरेव श्रेष्ठत्वमितिसर्वविद्वद्गोष्ठीसंवादः ॥ ३ ॥

तस्यैष आदेशो यदेतद्विद्युतो व्यद्युतदा ३ इतीन्यमीमिषदा ३ इत्यधिदैवतम् ॥४॥

ब्रह्मणो दर्शनं साक्षात्त्वं निषेधति—तस्य ब्रह्मण एष आदेशो दर्शनं विद्युतोदर्शनमिव। अथवा तस्यैष आदेश आदर्शः कार्यं वा। क आदर्शः? आह—यदेतद् ब्रह्म विद्युतो व्यद्युतद्विद्योतयतीतिभावः। न केवलं विद्योतनमेवापि तु न्यमीमिषत्। ता विद्युतस्तिरोधायतीत्यपि। विद्युतो विद्योतनं तिरोधापनं च सृष्टिनिर्माणं सृष्टिविलोपनं च वेदितव्यम्। तस्यैव माहात्म्येन

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जगज्जायते निलीनाति च । इत्यधिदैवतमधिका देवताधिदेवता । तामधिकृत्योपवर्णितं वृत्तमधिदैवतम् । देवतैव दैवतम् । अधिकं दैवतमधिदैवतम् । अधिदैवतमधिकृत्य कृतं वर्णनमधिदैवतम् । यथाकथञ्चिदर्थः सङ्गमनीयः । वस्तुतस्तु प्रथमैव व्याख्यादरणीया । तस्य दर्शनं विद्युत इव जातं विद्युत इव न्यमीमिषद् अदृष्टमभवदिति ॥४॥

अथाध्यात्मम् । यदेतद्गच्छतीव च मनोनेन चैतदुपस्मरत्यभीक्ष्णं सङ्कल्पः ॥५॥

अथेत्यानन्तर्ये । अधिदैवतमुक्त्वाध्यात्ममुच्यते । अत्रात्मशब्दो मनोवाचकः । तदेवाह–यदेतन्मनो यस्मादेतन्मना उद्गच्छतीव बहिर्निस्सरतीव यदा । न किञ्चित्स्मर्यते तद मनस उद्गमनं वेदितव्यम् । अनेन चानेनैवैतत्सर्वमुपस्मरति जन्तुः । मन एवाभीक्ष्णं सततमुपस्मरणसाधनम् । उपस्मृतिः सामान्यं ज्ञानम् । सर्वेषां वस्तूनां ज्ञानसाधनं मन एवेति । सङ्कल्पः सङ्कल्पयतीति संकल्पः । सङ्कल्पशब्देन विकल्पोपि संग्राह्यः । एवं च तदेव सङ्कल्पयति तदेव विकल्पयति । पुंस्त्वं तु शब्दमाहात्म्यादनपेक्षितत्वाद्वा लिङ्गस्य ॥५॥

तद्ध तद्वनं नाम तद्वनमित्युपासितव्यम् । स य एवं वेदाभि हैनं सर्वाणि भूतानि संवाञ्छन्ति ॥६॥

ब्राह्मणरीतेरत्रानुसन्धानम् । तत्तस्मादेव तद् उ अनं नाम । आनयति जीवान् प्राणयति तदनम् । ब्रह्मैव जगद्विद्योतयति तदेव तद्विलापयतीति तूक्तम् । सृष्टिप्रलया उक्तौ । व्यद्युतदिति च क्रियापदाभ्याम् । रक्षणं केन भवतीति तु नोक्तम् । तदेवात्राह तदेव तद्ब्रह्मैवानं जगत इति शेषः । उ अनमित्यत्र सन्धिस्त्वौपनिषदः । तद्ब्रह्मोपासितव्यम् । कथम् ? केन नाम्नेति ? अनमिति अनमिति नाम्नोपासितव्यम् । सर्वजीवजीवयितृ ब्रह्मैवेति जीवनप्राधान्यात्तज्जीवनप्रदनाम्नैव अनेत्यनेन तदुपासितव्यमिति । स य उपासक एवं वेद तदनमिति वेद सर्वाणि भूतानि एनमेवानोपासकमेवाभि अभितः संवाञ्छन्ति । प्राणनस्मरणादेव सर्वे तन्माहात्म्यावबोधपुरस्सरं तं कामयन्ते ॥६॥

उपनिषदं भो ब्रूहीत्युक्ता त उपनिषद् । ब्राह्मीं वाव त उपनिषदमब्रूमेति ॥७॥

आचार्यः कथयति भो उपनिषदं ब्रूहीति त्वया प्रार्थितम् । इति हेतुनोक्तोपदिष्टा ते तुभ्यमुपनिषदिति । न हि सामान्यतयोपनिषदुक्ता किन्तु ब्राह्मीं ब्रह्मसम्बन्धिनीमुपनिषदमब्रूमाब्रवमिति । अत्रेदं तत्त्वम् । केनिषितं पततीत्यादि जिज्ञासा । ब्रह्मैव सर्वजगत्कारणमित्युत्तरम् । ब्रह्मसम्बन्धि ज्ञानमेवोपनिषच्छब्दवाच्यम् । उपनिषदं ब्रूहीति त्वयोक्तम् । ततस्तुभ्यमुपनिषदुक्ता । सा च ब्रह्मसम्बन्धिन्येव ॥७॥

तस्यै तपो दमः कर्मेति प्रतिष्ठा । वेदाः सर्वाङ्गाणि सत्यमायतनम् ॥८॥

तस्या उपनिषद्विद्यायाः । षष्ठ्यर्थे चतुर्थी । तप इन्द्रियनिग्रहः सत्यभाषणादिकं च । दमो मनोनिग्रहः । कर्म लोकाविरुद्धमाचरणम् । इत्येतत्त्रयं प्रतिष्ठा प्रतिष्ठानं स्थितिस्थानमित्यर्थः । उपनिषद्विद्याया एतत्त्रयमाधारशिला । इतोप्यधिकमाह–वेदा ऋगाद्याः सर्वाङ्गाणि वेदाङ्गानि । सत्यं यथाश्रुतं यथादृष्टं यथानुभूतं च प्रकाशनम् । एतत्सर्वमुपनिषदो ब्रह्मविद्याया आयतनं निवासस्थानम् ॥८॥

एतदुपनिषज्ज्ञानस्य फलमभिधत्ते—

यो वा एतामेवं वेदापहत्य पाप्मानं स्वर्गे लोके ज्येये प्रतितिष्ठति प्रतितिष्ठति ॥९॥

यो वा यः कोप्येतामुपनिषद्विद्यामेवं तपोदमकर्मादिभीरक्षणीयां सत्यादिभिश्चोत्पादनीयां वेदाभिजानाति स पाप्मानं सकलपापपुञ्जमपहत्य विनाश्यानन्तेन्तरहिते ज्येये सर्वश्रेष्ठे स्वर्गे परमसुखास्पदे मोक्ष इत्यर्थः । स्वः सुखम् । तद्गमयतीति स्वर्गः । प्रतितिष्ठति स्वर्गे प्रतिष्ठां विन्दत इत्यर्थः । द्विरुक्तिरत्र वचनदार्ढ्यार्था ग्रन्थसमाप्त्यर्थावेति ॥९॥

इति केनोपनिषदि चतुर्थे खण्डे

श्रीकाशीपण्डितसभया "पण्डितराजे" त्युपाधिविभूषितेन परमहंस-परिव्राजकाचार्य-स्वामि श्रीभगवदाचार्येण निर्मितं केनोपनिषत्संस्कारभाष्यं समाप्तम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri